# গংগালহরী

{॥ গংগালহরী ॥}

সমৃদ্ধং সৌভাগ্যং সকলবসুধায়াঃ কিমপি তন্

মহৈশ্বর্যং লীলাজনিতজগতঃ খণ্ডপরশোঃ ।

শ্রুতীনাং সর্বস্বং সুকৃতমথ মূর্তং সুমনসাং

সুধাসোদর্যং তে সলিলমশিবং নঃ শময়তু ॥ ১॥

দরিদ্রাণাং দৈন্যং দুরিতমথ দুর্বাসনহৃদাং

দ্রুতং দূরীকুর্বন্ সকৃদপি গতো দৃষ্টিসরণিম্ ।

অপি দ্রাগাবিদ্যাদ্রুমদলনদীক্ষাগুরুরিহ

প্রবাহস্তে বারাং শ্রিয়মযমপারাং দিশতু নঃ ॥ ২॥

উদঞ্চন্মার্তণ্ডস্ফুটকপটহেরম্বজননী-

কটাক্ষব্যাক্ষেপক্ষণজনিতসংক্ষোভনিবহাঃ ।

ভবন্তু ত্বঙ্গন্তো হরশিরসি গঙ্গাতনুভুব-

স্তরঙ্গাঃ প্রোত্তুঙ্গা দুরিতভযভঙ্গায ভবতাম্ ॥ ৩॥

তবালম্বাদম্ব স্ফুরদলঘুগর্বেণ সহসা

ময়া সর্বেঽবজ্ঞাসরণিমথ নীতাঃ সুরগণাঃ ।

ইদানীমৌদাস্যং ভজসি যদি ভাগীরথি তদা

নিরাধারো হা রোদিমি কথয কেষামিহ পুরঃ ॥ ৪॥

স্মৃতিং যাতা পুংসামকৃতসুকৃতানামপি চ যা

হরত্যন্তস্তন্দ্রাং তিমিরমিব চন্দ্রাংশুসরণিঃ ।

ইযং সা তে মূর্তিঃ সকলসুরসংসেব্যসলিলা

মমান্তঃসন্তাপং ত্রিবিধমপি পাপং চ হরতাম্ ॥ ৫॥

অপি প্রাজ্যং রাজ্যং তৃণমিব পরিত্যজ্য সহসা

বিলোলদ্বানীরং তব জননি তীরং শ্রিতবতাম্ ।

সুধাতঃ স্বাদীযস্সলিলভরমাতৃপ্তি পিবতাং

জনানামানন্দঃ পরিহসতি নির্বাণপদবীম্ ॥ ৬॥

প্রভাতে স্নাতীনাং নৃপতিরমণীনাং কুচতটী-

গতো যাবন্মাতর্মিলতি তব তোযৈর্মৃগমদঃ ।

মৃগাস্তাবদ্বৈমানিকশতসহস্রৈঃ পরিবৃতা

বিশন্তি স্বচ্ছন্দং বিমলবপুষো নন্দনবনম্ ॥ ৭॥

স্মৃতং সদ্যঃ স্বান্তং বিরচযতি শান্তং সকৃদপি

প্রগীতং যৎপাপং ঝটিতি ভবতাপং চ হরতি ।

ইদং তদ্গঙ্গেতি শ্রবণরমণীযং খলু পদং

মম প্রাণপ্রান্তে বদনকমলান্তর্বিলসতু ॥ ৮॥

যদন্তঃ খেলন্তো বহুলতরসন্তোষভরিতা

ন কাকা নাকাধীশ্বরনগরসাকাঙ্ক্ষমনসঃ ।

নিবাসাল্লোকানাং জনিমরণশোকাপহরণং
তদেতত্তে তীরং শ্রমশমনধীরং ভবতু নঃ ॥ ৯॥

ন যৎসাক্ষাদ্বেদৈরপি গলিতভেদৈরবসিতং
ন যস্মিন্ জীবানাং প্রসরতি মনোবাগবসরঃ ।
নিরাকারং নিত্যং নিজমহিমনির্বাসিততমো
বিশুদ্ধং যত্তত্ত্বং সুরতটিনি তত্ত্বং ন বিষয়ঃ ॥ ১০॥

মহাদানৈর্ধ্যানৈর্বহুবিধবিতানৈরপি চ যন্
ন লভ্যং ঘোরাভিঃ সুবিমলতপোরাশিভিরপি ।
অচিন্ত্যং তদ্বিষ্ণোঃ পদমখিলসাধারণতযা
দদানা কেনাসি ত্বমিহ তুলনীযা কথয নঃ ॥ ১১॥

নৃণামীক্ষামাত্রাদপি পরিহরন্ত্যা ভবভযং
শিবাযাস্তে মূর্তেঃ ক ইহ মহিমানং নিগদতু ।
অমর্ষম্লানাযাঃ পরমমনুরোধং গিরিভুবো
বিহায শ্রীকণ্ঠঃ শিরসি নিযতং ধারযতি যাম্ ॥ ১২॥

বিনিন্দ্যান্যুন্মত্তৈরপি চ পরিহার্যাণি পতিতৈ-
রবাচ্যানি ব্রাত্যৈঃ সপুলকমপাস্যানি পিশুনৈঃ ।
হরন্তী লোকানামনবরতমেনাংসি কিযতাং
কদাপ্যশ্রান্তা ত্বং জগতি পুনরেকা বিজযসে ॥ ১৩॥

স্খলন্তী স্বর্লোকাদবনিতলশোকাপহৃতয়ে

জটাজূটগ্রন্থৌ যদসি বিনিবদ্ধা পুরভিদা ।

অয়ে নির্লোভানামপি মনসি লোভং জনয়তাং

গুণানামেবায়ং তব জননি দোষঃ পরিণতঃ ॥ ১৪॥

জডানন্ধান্ পঙ্গূন্ প্রকৃতিবধিরানুক্তিবিকলান্

গ্রহগ্রস্তানস্তাখিলদুরিতনিস্তারসরণীন্ ।

নিলিম্পৈর্নির্মুক্তানপি চ নিরয়ান্তর্নিপততো

নরানম্ব ত্রাতুং ত্বমিহ পরমং ভেষজমসি ॥ ১৫॥

স্বভাবস্বচ্ছানাং সহজশিশিরাণাময়মপা-

মপারস্তে মাতর্জয়তি মহিমা কোঽপি জগতি ।

মুদায়ং গায়ন্তি দ্যুতলমনবদ্যদ্যুতিভৃতঃ

সমাসাদ্যাদ্যাপি স্ফুটপুলকসান্দ্রাঃ সগরজাঃ ॥ ১৬॥

কৃতক্ষুদ্রৈনস্কানথ ঝটিতি সন্তপ্তমনসঃ

সমুদ্ধর্তুং সন্তি ত্রিভুবনতলে তীর্থনিবহাঃ ।

অপি প্রায়শ্চিত্তপ্রসরণপথাতীতচরিতা-

ন্নরানূরীকর্তুং ত্বমিব জননি ত্বং বিজয়সে ॥ ১৭॥

নিধানং ধর্মাণাং কিমপি চ বিধানং নবমুদাং

প্রধানং তীর্থানামমলপরিধানং ত্রিজগতঃ ।

সমাধানং বুদ্ধেরথ খলু তিরোধানমধিযাং
শ্রিযামাধানং নঃ পরিহরতু তাপং তব বপুঃ ॥ ১৮॥

পুরো ধাবং ধাবং দ্রবিণমদিরাঘূর্ণিতদৃশাং
মহীপানাং নানাতরুণতরখেদস্য নিযতম্ ।
মমৈবাযং মন্তুঃ স্বহিতশতহন্তুর্জডধিযো
বিযোগস্তে মাতর্যদিহ করুণাতঃ ক্ষণমপি ॥ ১৯॥

মরুল্লীলালোলল্লহরিলুলিতাম্ভোজপটলী-
স্খলৎপাংসুব্রাতচ্ছুরণবিসরৎকৌঙ্কুমরুচি ।
সুরস্ত্রীবক্ষোজক্ষরদগরুজম্বালজটিলং
জলং তে জম্বালং মম জননজালং জরযতু ॥ ২০॥

সমুৎপত্তিঃ পদ্মারমণপদপদ্মামলনখা-
ন্নিবাসঃ কন্দর্পপ্রতিভটজটাজূটভবনে ।
অথাঽযং ব্যাসঙ্গো হতপতিতনিস্তারণবিধৌ
ন কস্মাদুৎকর্ষস্তব জননি জাগর্তু জগতি ॥ ২১॥

নগেভ্যো যান্তীনাং কথয তটিনীনাং কতমযা
পুরাণাং সংহর্তুঃ সুরধুনি কপর্দোঽধিরুরুহে ।
কযা বা শ্রীভর্তুঃ পদকমলমক্ষালি সলিলৈ-
স্তুলালেশো যস্যাং তব জননি দীযেত কবিভিঃ ॥ ২২॥

বিধত্তাং নিঃশঙ্কং নিরবধি সমাধিং বিধিরহো

সুখং শেষে শেতাং হরিরবিরতং নৃত্যতু হরঃ ।

কৃতং প্রায়শ্চিত্তৈরলমথ তপোদানযজনৈঃ

সবিত্রী কামানাং যদি জগতি জাগর্তি জননী ॥ ২৩॥

অনাথঃ স্নেহার্দ্রাং বিগলিতগতিঃ পুণ্যগতিদাং

পতন্ বিশ্বোদ্ধর্ত্রীং গদবিগলিতঃ সিদ্ধভিষজম্ ।

সুধাসিন্ধুং তৃষ্ণাকুলিতহৃদয়ো মাতরময়ং

শিশুঃ সম্প্রাপ্তস্ত্বামহমিহ বিদধ্যাঃ সমুচিতম্ ॥ ২৪ ॥

বিলীনো বৈ বৈবস্বতনগরকোলাহলভরো

গতা দূতা দূরং ক্বচিদপি পরেতান্ মৃগয়িতুম্ ।

বিমানানাং ব্রাতো বিদলয়তি বীথির্দিবিষদাং

কথা তে কল্যাণী যদবধি মহীমণ্ডলমগাত্ ॥ ২৫॥

স্ফুরৎকামক্রোধপ্রবলতরসঞ্জাতজটিল-

জ্বরজ্বালাজালজ্বলিতবপুষাং নঃ প্রতিদিনম্ ।

হরন্তাং সন্তাপং কমপি মরুদুল্লাসলহরি-

চ্ছটাচঞ্চৎপাথঃকণসরণয়ো দিব্যসরিতঃ ॥ ২৬॥

ইদং হি ব্রহ্মাণ্ডং সকলভুবনাভোগভবনং

তরঙ্গৈর্যস্যান্তর্লুঠতি পরিতস্তিন্দুকমিব ।

স এষ শ্রীকণ্ঠপ্রবিততজটাজূটজটিলো
জলানাং সঙ্ঘাতস্তব জননি তাপং হরতু নঃ ॥ ২৭॥

ত্রপন্তে তীর্থানি ত্বরিতমিহ যস্যোদ্ধৃতিবিধৌ
করং কর্ণে কুর্বন্ত্যপি কিল কপালিপ্রভৃতযঃ ।
ইমং ত্বং মামম্ব ত্বমিযমনুকম্পার্দ্রহৃদযে
পুনানা সর্বেষামঘমথনদর্পং দলযসি ॥ ২৮॥

শ্বপাকানাং ব্রাতৈরমিতবিচিকিৎসাবিচলিতৈ-
র্বিমুক্তানামেকং কিল সদনমেনঃপরিষদাম্ ।
অহো মামুদ্ধর্তুং জননি ঘটযন্ত্যাঃ পরিকরং
তব শ্লাঘাং কর্তুং কথমিব সমর্থো নরপশুঃ ॥ ২৯॥

ন কোঽপ্যেতাবন্তং খলু সমযমারভ্য মিলিতো
যদুদ্ধারাদারাদ্ভবতি জগতো বিস্মযভরঃ ।
ইতীমামীহাং তে মনসি চিরকালং স্থিতবতী-
মযং সম্প্রাপ্তোঽহং সফলযিতুমম্ব প্রণয নঃ ॥ ৩০॥

শ্ববৃত্তিব্যাসঙ্গো নিযতমথ মিথ্যাপ্রলপনং
কুতর্কেশ্বভ্যাসঃ সততপরপৈশুন্যমননম্ ।
অপি শ্রাবং শ্রাবং মম তু পুনরেবং গুণগণা-
নৃতে ত্বৎকো নাম ক্ষণমপি নিরীক্ষেত বদনম্ ॥ ৩১॥

বিশালাভ্যামাভ্যাং কিমিহ নয়নাভ্যাং খলু ফলং
ন যাভ্যামালীঢা পরমরমণীয়া তব তনুঃ ।
অয়ং হি ন্যক্কারো জননি মনুজস্য শ্রবণয়ো-
র্যয়োর্নান্তর্যাতস্তব লহরিলীলাকলকলঃ ॥ ৩২ ॥

বিমানৈঃ স্বচ্ছন্দং সুরপুরময়ন্তে সুকৃতিনঃ
পতন্তি দ্রাক্ পাপা জননি নরকান্তঃ পরবশাঃ ।
বিভাগোঽয়ং তস্মিন্নশুভময়মূর্তৌ জনপদে
ন যত্র ত্বং লীলাদলিতমনুজাশেষকলুষা ॥ ৩৩॥

অপি ঘ্নন্তো বিপ্রানবিরতমুশন্তো গুরুসতীঃ
পিবন্তো মৈরেয়ং পুনরপি হরন্তশ্চ কনকম্ ।
বিহায় ত্বয্যন্তে তনুমতনুদানাধ্বরজুষা-
মুপর্যস্ব ক্রীডন্ত্যখিলসুরসম্ভাবিতপদাঃ ॥ ৩৪ ॥

অলভ্যং সৌরভ্যং হরতি সততং যঃ সুমনসাং
ক্ষণাদেব প্রাণানপি বিরহশস্ত্রক্ষতহৃদাম্ ।
ত্বদীয়ানাং লীলাচলিতলহরীণাং ব্যতিকরাত্
পুনীতে সোঽপি দ্রাগহহ পবমানস্ত্রিভুবনম্ ॥ ৩৫ ॥

কিয়ন্তঃ সন্ত্যেকে নিয়তমিহলোকার্থঘটকাঃ
পরে পূতাত্মানঃ কতি চ পরলোকপ্রণয়িনঃ ।

সুখং শেতে মাতস্তব খলু কৃপাতঃ পুনরযং
জগন্নাথঃ শশ্বত্ত্বযি নিহিতলোকদ্বযভরঃ ॥ ৩৬॥

ভবত্যা হি ব্রাত্যাধমপতিতপাখণ্ডপরিষত্
পরিত্রাণস্নেহঃ শ্লথযিতুমশক্যঃ খলু যথা ।
মমাপ্যেবং প্রেমা দুরিতনিবহেষ্বম্ব জগতি
স্বভাবোঽযং সর্বৈরপি খলু যতো দুষ্পরিহরঃ ॥ ৩৭॥

প্রদোষান্তর্নৃত্যৎপুরমথনলীলোদ্ধৃতজটা-
তটাভোগপ্রেঙ্খল্লহরিভুজসন্তানবিধুতিঃ ।
বিলক্রোডক্রীডজ্জলডমরুটঙ্কারসুভগ-
স্তিরোধত্তাং তাপং ত্রিদশতটিনীতাণ্ডববিধিঃ ॥ ৩৮॥

সদৈব ত্বয্যেবার্পিতকুশলচিন্তাভরমিমং
যদি ত্বং মামম্ব ত্যজসি সমযেঽস্মিন্সুবিষমে ।
তদা বিশ্বাসোঽযং ত্রিভুবনতলাদস্তমযতে
নিরাধারা চেযং ভবতি খলু নির্ব্যাজকরুণা ॥ ৩৯॥

কপর্দাদুল্লস্য প্রণযমিলদর্ধাঙ্গযুবতেঃ
পুরারেঃ প্রেঙ্খন্ত্যো মৃদুলতরসীমন্তসরণৌ ।
ভবান্যা সাপত্ন্যস্ফুরিতনযনং কোমলরুচা
করেণাক্ষিপ্তাস্তে জননি বিজযন্তাং লহরযঃ ॥ ৪০॥

প্রপদ্যন্তে লোকাঃ কতি ন ভবতীমত্রভবতী-

মুপাধিস্তত্রায়ং স্ফুরতি যদভীষ্টং বিতরসি ।

শপে তুভ্যং মাতর্মম তু পুনরাত্মা সুরধুনি

স্বভাবাদেব ত্বয্যমিতমনুরাগং বিধৃতবান্ ॥ ৪১॥

ললাটে যা লোকৈরিহ খলু সলীলং তিলকিতা

তমো হন্তুং ধত্তে তরুণতরমার্তণ্ডতুলনাম্ ।

বিলুম্পন্তী সদ্যো বিধিলিখিতদুর্বর্ণসরণিং

ত্বদীযা সা মৃৎস্না মম হরতু কৃৎস্নামপি শুচম্ ॥ ৪২॥

নরান্ মূঢাংস্তত্তজ্জনপদসমাসক্তমনসো

হসন্তঃ সোল্লাসং বিকচকুসুমব্রাতমিষতঃ ।

পুনানাঃ সৌরভ্যৈঃ সততমলিনো নিত্যমলিনান্

সখাযো নঃ সন্তু ত্রিদশতটিনীতীরতরবঃ ॥ ৪৩॥

যজন্ত্যেকে দেবান্ কঠিনতরসেবাংস্তদপরে

বিতানব্যাসক্তা যমনিযমরক্তাঃ কতিপযে ।

অহং তু ত্বন্নামস্মরণকৃতকামস্ত্রিপথগে

জগজ্জালং জানে জননি তৃণজালেন সদৃশম্ ॥ ৪৪॥

অবিশ্রান্তং জন্মাবধি সুকৃতজন্মার্জনকৃতাং

সতাং শ্রেযঃ কর্তুং কতি ন কৃতিনঃ সন্তি বিবুধাঃ ।

নিরস্তালম্বানামকৃতসুকৃতানাং তু ভবতীং
বিনাঽমুষ্মিংল্লোকে ন পরমবলোকে হিতকরম্ ॥ ৪৫॥

পয়ঃ পীত্বা মাতস্তব সপদি যাতঃ সহচরৈ-
র্বিমূঢৈঃ সংরন্তুং ক্বচিদপি ন বিশ্রান্তিমগমম্ ।
ইদানীমুৎসঙ্গে মৃদুপবনসঞ্চারশিশিরে
চিরাদুন্নিদ্রং মাং সদয়হৃদয়ে শায়য চিরম্ ॥ ৪৬॥

বধান দ্রাগেব দ্রঢিমরমণীয়ং পরিকরং
কিরীটে বালেন্দুং নিয়ময় পুনঃ পন্নগগণৈঃ ।
ন কুর্যাস্ত্বং হেলামিতরজনসাধারণতয়া
জগন্নাথস্যায়ং সুরধুনি সমুদ্ধারসময়ঃ ॥ ৪৭॥

শরচ্চন্দ্রশ্বেতাং শশিশকলশ্বেতালমুকুটাং
করৈঃ কুম্ভাম্ভোজে বরভয়নিরাসৌ চ দধতীম্ ।
সুধাধারাকারাভরণবসনাং শুভ্রমকর-
স্থিতাং ত্বাং যে ধ্যায়ন্ত্যুদয়তি ন তেষাং পরিভবঃ ॥ ৪৮॥

দরস্মিতসমুল্লসদ্বদনকান্তিপূরামৃতৈ-
র্ভবজ্বলনভর্জিতাননিশমূর্জয়ন্তী নরান্ ।
চিদেকময়চন্দ্রিকাচয়চমৎকৃতিং তন্বতী
তনোতু মম শন্তনোঃ সপদি শন্তনোরঙ্গনা ॥ ৪৯॥

মন্ত্রৈর্মীলিতমৌষধৈর্মুকুলিতং ত্রস্তং সুরাণাং গণৈঃ

স্রস্তং সান্দ্রসুধারসৈর্বিদলিতং গারুত্মতৈর্গ্রাবভিঃ ।

বীচিক্ষালিতকালিযাহিতপদে স্বর্লোককল্লোলিনি

ত্বং তাপং তিরযাধুনা মম ভবজ্বালাবলীঢাত্মনঃ ॥ ৫০॥

দ্যূতে নাগেন্দ্রকৃত্তিপ্রমথগণমণিশ্রেণিনন্দীন্দুমুখ্যং

সর্বস্বং হারযিত্বা স্বমথ পুরভিদি দ্রাক্ পণীকর্তুকামে ।

সাকূতং হৈমবত্যা মৃদুলহসিতযা বীক্ষিতাযাস্তবাম্ব

ব্যালোলোল্লাসিবল্লল্লহরিনটঘটীতাণ্ডবং নঃ পুনাতু ॥ ৫১॥

বিভূষিতানঙ্গরিপূত্তমাঙ্গা সদ্যঃকৃতানেকজনার্তিভঙ্গা ।

মনোহরোত্তুঙ্গচলত্তরঙ্গা গঙ্গা মমাঙ্গান্যমলীকরোতু ॥ ৫২॥

ইমাং পীযূষলহরীং জগন্নাথেন নির্মিতাম্ ।

যঃ পঠেত্তস্য সর্বত্র জাযন্তে সুখসম্পদঃ ॥ ৫৩॥

Encoded and proofread by Arvind Kolhatkar akolhatkar at rogers.com

Proofread by Sunder Hattangadi sunderh at hotmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

Ganga Lahari Lyrics in Bengali PDF
% File name : gangAlaharI.itx
% Category : laharI
% Location : doc_devii
% Author : Jagannatha Pandit
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Arvind Kolhatkar akolhatkar at rogers.com
% Proofread by : Arvind Kolhatkar akolhatkar at rogers.com, Sunder Hattangadi
% Latest update : January 12, 2005, June 21, 2011
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website